1-7 पञ्च प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकं एकैकः अङ्कः ।

1 – 7 വരെയുള്ള ചോദ്യങ്ങളിൽ 5 എണ്ണത്തിന് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും തിരഞ്ഞെടുത്തെഴുതുക. ഒരു സ്കോർ വീതം. (5 × 1 = 5)

1. सिद्धार्थस्य पिता कः ?

(शुद्धोदनः, चाणक्यः, सुपुत्रः)

2. यतिवर्यः – समानपदं किम् ?

(कविश्रेष्ठः, संन्यासिश्रेष्ठः, गुरुश्रेष्ठः)

3. सूर्याय सङ्कल्पितम् अलोकसामान्यं मन्दिरं कुत्र ?

(अजन्ता, काशी, कोणार्क्)

4. सङ्गणकीयभाषाविज्ञाने कस्याः भाषायाः प्रमुखं स्थानं कल्पितम् ?

(संस्कृतम्, मलयालम्, आङ्गलेयम्)

5. कौटिल्यशिष्यः कः ?

(चन्द्रगुप्तः, नन्दः, चन्दनदासः)

6. क्रोधात् किं संभवति ?

(स्मृतिविभ्रमः, सम्मोहः, बुद्धिनाशः)

7. मनोनियन्त्रणार्थम् अष्टाङ्गानि निर्दिष्टानि । कुत्र ?

(महाभारते, रामायणे, योगसूत्रे)

8-9 प्रश्नेषु द्वयोः उत्तरम् उदाहरणानुसारं लिखत । प्रत्येकं द्वौ अङ्कौ ।

8 മുതൽ 9 വരെയുള്ള ചോദ്യങ്ങളുടെ ഉത്തരം ഉദാഹരണമനുസരിച്ച് എഴുതുക. 2 സ്കോർ വീതം. (2 × 2 = 4)

8. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा: – तथापि – तथा + अपि ।

(क) कदापि – ______ + ______ ।

(ख) केनापि – ______ + ______ ।

9. उदाहरणानुसारं सन्धत्त ।

उदा: – संयमनम् + अपि = संयमनमपि ।

(क) – परिवर्तनम् + अपि = ______ ।

(ख) – शासनम् + अपि = ______ ।

**10-13 प्रश्नेषु त्रयाणां उत्तराणि लिखत । प्रत्येकं त्रयः अङ्कः ।**

**10 മുതൽ 13 വരെയുള്ള ചോദ്യങ്ങളിൽ നിന്നും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 3 സ്കോർ വീതം.** **(3 × 3 = 9)**

10. उदाहरणानुसारं वाक्यद्वयं योजयत ।

उदा: – अमेया पुस्तकं पश्यति । पाठं वाचयति ।

अमेया पुस्तकं दृष्ट्वा पाठं वाचयति ।

(क) गणेशः विद्यालयं गच्छति । पाठं पठति ।

______________________ ।

(ख) आद्रा गानं शृणोति । नृत्यं करोति ।

______________________ ।

(ग) देवः स्नानं करोति । मन्दिरं गच्छति ।

______________________ ।

11. "को हेतुः ?" इति पाठभागमनुसृत्य पेटिकातः पदानि उपयुज्य वाक्यनिर्माणं कुरुत ।

| | | |
|---|---|---|
| किञ्चित्कालम् | मया | कुर्वन्तः । |
| एतत् सर्वम् | कर्माणि | उपविशामि । |
| अतिकठिनानि | तूष्णीम् | दृष्टम् । |

12. अधः प्रदत्तं गद्यभागं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि चित्वा लिखत ।

श्रीनारायणगुरुदेवस्य भूतदयालुतां ज्ञात्वा सः न्यायाधीशः उपक्षेपं तिरस्कृत्य चोरकल्पं स्वेच्छया गन्तुम् अनुजज्ञे ।

(1) क्त्वान्तम् ............. ।

(2) ल्यबन्तम् ............. ।

(3) तुमुन्नन्तम् ............. ।

13. संस्कृतभाषाया अनुवदत् ।

(क) സംസ്കൃത രൂപകാദിനയ മാണ് കൂടിയാട്ടം.

Koodiyatam is a Sanskrit theatrical performance.

(ख) നാട്യശാസ്ത്രത്തിന്റെ രചയിതാവാണ് ഭരതമുനി.

Bharathamuni is the author of the Natyashastra.

(ग) കൃഷ്ണ നാട്ടവും ഒരു സംസ്കൃത കലാരൂപമാണ്.

Krishnanattam is also an art form in Sanskrit.

14-17 प्रश्नानां उत्तराणि निर्देशानुसारं लिखत । प्रत्येकं चत्वारः अङ्काः ।

14 മുതൽ 17 വരെയുള്ള ചോദ്യങ്ങൾക്ക് നിർദ്ദേശമനുസരിച്ച് ഉത്തരമെഴുതുക. ഓരോന്നിനും 4 സ്കോർ വീതം. **(4 × 4 = 16)**

14. अधो रेखाङ्कितानां पदानां स्थाने समानार्थकपदानि कोष्ठकात् उद्धृत्य खण्डिकां पुनर्लिखत ।

**तदा शीतलः अनिलः विचचाल । <u>मेघः</u> अमृतम् अवर्षत । नचिरेणैव वृक्षः <u>पल्लवितः</u> पत्रैः शाखाभिः च सम्पुष्टः यथापूर्वं <u>परिणतिं</u> प्राप्तवान् । तत्र एकस्यां शाखायां वृक्षः तां <u>दोलायितुं</u> प्रचक्रमे ।**

**(सञ्जातपल्लवः, दोलनं कर्तुं, परिणामं, जलदः)**

15. अधः प्रदत्तस्य श्लोकस्य गद्यक्रमं लिखत ।

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।

अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ॥

आत्मना ______ बालकः बलवान् ______ च ______ अद्भुतानन्दशान्तिभिः ______ अवर्धत ।

16. पारस्पर्यमनुसृत्य योजयत ।

राक्षसः – विष्णुगुप्तः ।

चाणक्यः – पर्वतकस्य पुत्रः ।

मलयकेतुः – वृषलः ।

चन्द्रगुप्तः – नन्दवंशस्य प्रधानमन्त्री ।

17. अर्थानुसारं क्रमीकुरुत ।

| | |
|---|---|
| जीवितविजयार्थं मनोनियन्त्रणम् – अनिवार्यं भवति । | കർമ്മകുശലത മനസ്സിന്റെ സ്ഥൈര്യത്തെ ആശ്രയിച്ചാണ് നിൽക്കുന്നത്. |
| उपबोधमनसि परिवर्तनमपि योगेन साध्यम् । | യോഗശാസ്ത്രം മനസ്സിന്റെ ശുദ്ധീകരണത്തിനായുള്ള മാർഗ്ഗം നിർദ്ദേശിക്കുന്നു. |
| कर्मकौशलं मनसः स्थैर्यम् आश्रित्य तिष्ठति । | ജീവിത വിജയത്തിന് മനോനിയന്ത്രണം അനിവാര്യമാണ്. |
| योगशास्त्रं मनसः विमलीकरणाय उपायं निर्दिशति । | ഉപബോധമനസ്സിന്റെ പരിവർത്തനവും യോഗയാൽ സാധ്യമാണ്. |

**18-22 प्रश्नेषु चतुर्णाम् उत्तराणि निर्देशानुसारं लिखत । प्रत्येकं पञ्च अङ्काः ।**
**18 മുതൽ 22 വരെയുള്ള ചോദ്യങ്ങളിൽ 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. ഓരോന്നിനും 5 സ്കോർ വീതം.** **(4 × 5 = 20)**

18. प्रस्तुताप्रस्तुतानि योजयत ।

| प्रस्तुतानि | अप्रस्तुतानि |
|---|---|
| आवासः | यमः |
| प्रियसखीमाला | विषम् |
| कन्दर्पः | हरिणी |
| मलयजपङ्कः | जालः |
| राधा | विपिनम् |

19. यथोचितं योजयत ।
1. गीतगोविन्दम् – तापसी
2. सालारम् – के. श्रीकुमार्
3. शारिका – भगवद्गीता
4. आषा मेनोन् – जयदेवः
5. कृष्णः – वृद्धसदनम्

20. प्रादेशिकभाषाया अनुवदत ।
1. आत्मनाथवियोगात् व्रणितात्मा यशोधरा भूतकालस्मृतिषु व्यापृता अभवत् ।
2. तत्र भवान् छन्देन सहैव जनपदं द्रष्टुं प्रतिष्ठत ।
3. वार्धक्यं रोगमरणं च साधारणमेव हि ।
4. यशोधरे ! जीवितस्य वेदनामहजानम् ।
5. दृष्टानां हेतुं परिचिन्तयामि ।

21. गद्यभागं पठित्वा अधः प्रदत्तानां प्रश्नानामुत्तराणि लिखत ।

वीतरागभयक्रोधानां यतिवर्याणां मनसि ईदृशी द्वेषभावना वर्तते चेत्, विना विलम्बं समस्तं संन्यासिकुलम् अधर्मे पतिष्यति इति न सन्देहः । क्षुत्पीडितम् एवं मन्दिराङ्कणे बद्ध्वा ताडनैः दण्डयति चेत् अयं रोदनसम्मिश्रः वायुः श्वसनयोग्यो न भवेत्, तस्मात् अहं इतः गच्छामि इत्युक्त्वा अन्यत्र अगच्छत् ।

(1) "समस्तं संन्यासिकुलम् अधर्मे पतिष्यति इति न सन्देहः" – कुतः ?

(2) अयं रोदनसम्मिश्रः वायुः श्वसनयोग्यो न भवेत् । कुतः ?

(3) गद्यभागस्य उचितं शीर्षकं लिखत ।

22. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।।

(1) सम्मोहात् किं भवति ?

(2) बुद्धिनाशः कस्मात् संभवति ?

(3) बुद्धिः इति पदस्य समानार्थकं पदं कोष्ठकात् चित्वा लिखत । (धीः, आत्मा, धैर्यः)

(4) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

**23-26 प्रश्नेभ्यः त्रयाणाम् उत्तराणि लिखत । प्रत्येकं षडङ्काः ।**

**23 മുതൽ 26 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 6 സ്കോർ വീതം.**

**(3 × 6 = 18)**

23. अधः प्रदत्तेषु इष्टतमं श्लोकं चित्वा आस्वादनटीकां रचयत ।

(1) नयनविषयमपि किसलयतल्पम् ।
कलयति विहितहुताशनकल्पम् ।।

(2) सरसमसृणमपि मलयजपङ्कं ।
पश्यति विषमिव वपुषि सशङ्कम् ।।

(3) स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरिव भारम् ।

24. कथास्तम्भं क्रमीकुरुत ।

- शारिकायाः स्नेहे, ममतायां, आर्द्रतायां च सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति ।
- शारिका व्याधस्य लक्ष्यमभवत् ।
- शारिका वृक्षं त्यक्त्वा गन्तुम् अशक्ता ।
- व्याधस्य शरेण वृक्षः विद्धः विषबाधितः च ।
- वृक्षः यथापूर्वं परिणतिं प्राप्तवान् ।
- शुष्कं वृक्षं त्यक्त्वा सर्वे गतवन्तः ।

25. प्रदत्ताः सूचनाः पठित्वा पद्मश्री पी.के. नारायणन्नम्प्यार् महोदयस्य जीवनचरितं लिखत ।

| | | |
|---|---|---|
| जननम् | – | 27-05-1926 |
| देशः | – | किल्लिकुरिश्शिमङ्गलम्, लक्किटि, पालक्काट् । |
| पितरौ | – | पद्मश्री माणिमाधवचाक्यार् श्रीदेवीनङ्यारम्मा च । |
| कर्मरङ्गः | – | कूटियाट्टम्, नङ्यार्कूत्तु, पाठकम् । |
| रचनाः | – | अन्तकवधम्, श्रीकृष्णचरितं, नङ्यार्कूत्तू, मन्त्राङ्कम् |
| पुरस्काराः | – | पद्मश्री, केन्द्रसंगीतनाटक अक्कादमी – फेलोशिप् । |

26. अधः प्रदत्तं गद्यभागं संगृह्य लिखत ।

पुरीतः कोणार्कं प्रति पन्था एका ऋजुरेखा भवति । माकिं ३२ कि.मी. परिमितं दूरं वर्तते । पन्थानम् उभयतः आवासस्य लक्षणमपि न दृश्यते । प्राचीनाः ग्रामाः तेषु प्रान्तेषु विलयीभूताः इति प्रतीयते । पन्थानं प्रविष्टे जगन्नाथस्य रथोत्सवश्रुतयः शनैर्मन्दीभूताः इव अनुभवेयुः । अस्यां धन्यस्थल्यां विराजमाने सूर्याय सङ्कल्पिते अलोकसामान्ये मन्दिरे आराधना न भवति । कोणार्कमार्गं प्रविष्टे एव वयं तस्य इतिहासस्य सङ्कीर्णखनीषु अवगाढाः भवामः ।

ओडीषायाः भूस्थितिरस्माभिः नात्र अतिगम्यतेऽधुना, परन्तु पुरावृत्तानाम् आत्मार्पणानाञ्च प्रकाशखण्डानि एव । किञ्चिद्गमनेन उभयतः वनानि प्रत्यक्षमायान्ति । पवने वाति सति तेभ्यः कानिचन स्वरवैचित्र्याणि आविर्भवन्ति । शिलाकाण्यानां प्रौढं भूतकालमेव ते स्वराः स्मारयन्ति । नागरिकतायाः स्पर्शम् अननुभूयमाने तस्मिन् काननान्ते भारतसंस्कृतेः ज्योतिश्शिखरं रूपवत्कुर्वन्नासीत् ।

27-28 प्रश्नस्य एकस्य उत्तरं निर्देशानुसारं लिखत । अष्ट अङ्कः ।

27 മുതൽ 28 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരമെഴുതുക. 8 സ്കോർ വീതം.

$(1 \times 8 = 8)$

27. पटकथां लिखत ।

कोऽपि मां स्पृशति........का एषा ? शारिका सहसा प्रबुद्धा ।

"वत्से !"

शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत् ।

"अम्ब प्रणामः ।"

"शारिके ! जानामि सर्वं वृत्तान्तम् । सम्यगाचरितं भवत्या । तव स्नेहस्य, ममतायाः आर्द्रतायाः च फलं नूनम् प्राप्स्थसि ।"

तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।

28. संगणकीयभाषाविज्ञानमधिकृत्य सूचनानुसारम् उपन्यासं लिखत ।

सूचना : विविधाः भाषाः, यान्त्रिकभाषा, स्वाभाविकभाषा, स्वाभाविकभाषान्तरितं मुखम्, स्वाभाविकभाषाविश्लेषणम्, यान्त्रिकानुवादः, वाणीसंश्लेषणम्, व्याकरणविधिः